“उदरे पच्यमानानामाध्मानादिक्षुसारवत् ।
कफशोणितमांसानां सारो जिह्वा प्रजायते ॥”
इति सुश्रुते शारीरस्थाने ४र्थे अध्याये ॥)

जिह्वानिर्लेखनं, क्ली, (जिह्वाया निर्लेखनं संस्कारः ।) जिह्वामार्ज्जनम् । जिवछाँचडान इति भाषा । जिह्वामार्ज्जनद्रव्यम् । जिवछाँचड़ा चेयाड़ि इति भाषा । तत् दशाङ्गुलं कोमलं श्लक्ष्णं स्वर्णरूप्यताम्रलोहनिर्म्मितं जिह्वामलापकर्षणे प्रशस्तम् । तस्य गुणः । वक्त्रवैरस्यजिह्वाश्रित-मलनाशित्वम् । आरोग्यरुचिकारित्वञ्च । इति राजवल्लभः ॥
(“जिह्वानिर्लेखनं रौप्यं सौवर्णं वार्क्षमेव च ।
तन्मलापहरं शस्तं मृदु श्लक्ष्णं दशाङ्गुलम् ।
मुखवैरस्यदौर्गन्ध्य-शोफजाड्यहरं सुखम् ॥”
अस्याधिक्येन रोगजनकता यथा,—
“जिह्वातिलेखनाच्छुष्कभक्षणादभिघाततः ।
कुपितो हनुमूलस्थः स्रंसयित्वानिलो हनू ॥
करोति विवृतास्यत्वमथवा संवृतास्यताम् ।
हनुस्रंसः स तेन स्यात् कृच्छ्राच्चर्व्वणभाषणम् ॥”
इति वाभटे निदानस्थाने पञ्चदशेऽध्याये ॥)

जिह्वापः, पुं, (जिह्वया पिबतीति । पा + “आतो-ऽनुपसर्गे कः ।” ३ । २ । ३ । इति कः ।) कुक्कुरः । व्याघ्रः । विडालः । भल्लूकः । इति शब्दरत्नावली ॥ चित्रकव्याघ्रः । इति विश्वः ॥

जिह्वामलं, क्ली, (जिह्वाया मलम् ।) जिह्वा-स्थितमलम् । तत्पर्य्यायः । कुलुकम् २ । इति त्रिकाण्डशेषः ॥

जिह्वामूलीयः, पुं, (जिह्वामूले भवः । “जिह्वा-मूलाङ्गुलेश्छः ।” ४ । ३ । ६२ । इति छः ।) वज्राकृतिवर्णः । वोपदेवेनास्य म इति संज्ञा कृता । स तु कखपरे विसर्गस्थाने भवति । यथा हरि × काम्यः । अस्योच्चारणं विसर्गवत् । इति व्याकरणम् ॥
“अधोविरेकयुक्ताग्रामात्रवद्द्वयरूपकः ।
जिह्वामूलीय इत्येव गजकुम्भोपमोऽपरः ॥”
इति सुपद्मव्याकरणटीका ॥

जिह्वारदः, पुं, (जिह्वा एव रदो दन्त इव यस्य ।) पक्षी । इति हारावली । ५६ ॥

जिह्वारोगः, पुं, (जिह्वाया रोगः ।) मुखरोगा-न्तर्गतरसनाजातव्याधिः । तत्र जिह्वारोगाणां निदाननामसङ्ख्याः प्राह ।
“वातजः पित्तजश्चापि कफजोऽलाससंज्ञकः ।
उपजिह्विका च गदा जिह्वायां पञ्च कीर्त्तिताः ॥”
तत्र वातजस्य लक्षणमाह ।
जिह्वानिलेनस्फुटिता प्रसुप्ता
भवेच्च शाकच्छदनप्रकाशा ।
स्फुटिताभग्नाविदीर्णा । प्रसुप्ता रसानभिज्ञ-तया सुप्तेव । शाकच्छदनप्रकाशा शाको मरु-भूमिजो द्रुमः तद्वत् कण्टकचिता ॥ * ॥
पित्तजमाह ।
पित्तात् सदाहैरुपचीयते च
दीर्घैः सरक्तैरपिकण्टकैश्च ।
अयं रोगो लोके जलीति ख्यातः । जाड़ीति वङ्गभाषा ॥ * ॥ कफजमाह ।
कफेन गुर्व्वी बहलाचिता च
मांसोच्छ्रयैः शाल्मलिकण्टकाभैः ।
बहला स्थूला । मांसोच्छ्रयैः मांसजकण्टकैः ॥ * ॥ अलासमाह ।
जिह्वातले यः श्वयथुः प्रगाढ़ः
सोऽलाससंज्ञः कफरक्तमूर्त्तिः ।
जिह्वां सरुक् स्तम्भयति प्रवृद्धो
मूले च जिह्वा भृशमेति पाकम् ॥
प्रगाढ़ः प्रकर्षेण गाढ़ो दारुणः । कफरक्तमूर्त्तिः कफरक्ताभ्यां मूर्त्तिर्यस्य स कफरक्तज इत्यर्थः । जिह्वास्तम्भेन वायुरप्यत्र बोद्धव्यः । भृशं पाकेन पित्तञ्च । अतस्त्रिदोषजोऽयम् । असाध्यत्व-ञ्चास्य ॥ * ॥ उपजिह्विकामाह ।
जिह्वाग्ररूपः श्वयथुर्हि जिह्वा-
मुन्नाम्य जातः कफरक्तयोनिः ।
प्रसेककण्डूपरिदाहयुक्तः
प्रकथ्यतेऽसावुपजिह्विकेति ॥
जिह्वाग्ररूपः जिह्वायाकृतिः ॥” * ॥
अथ जिह्वारोगाणां चिकित्सा ।
“जिह्वागतविकाराणां शस्तं शोणितमोक्षणम् ।
गुडूचीपिप्पलीनिम्बकवलः कटुभिः सुखः ॥
ओष्ठप्रकोपेऽनिलजे यदुक्तं प्राक्चिकित्सितम् ।
कण्टकेष्वनिलोत्थेषु तत् कार्य्यं भिषजा खलु ॥
पित्तजे परिघृष्टे तु निःसृते दुष्टशोणिते ।
प्रतिसारणगण्डूषनस्यञ्च मधुरं हितम् ॥
कण्टकेषु कफोत्थेषु लिखितेष्वसृजः क्षये ।
पिप्पल्यादिर्म्मधुयुतः कार्य्यस्तु प्रतिसारणे ॥
उपजिह्वान्तु संलिख्य क्षारेण प्रतिसारयेत् ।
शिरोविरेकगण्डूषधूमैश्चैनामुपाचरेत् ॥
व्योषक्षाराभयावह्निचूर्णमेतत् प्रघर्षणम् ।
उपजिह्वाप्रशान्त्यर्थमेभिस्तैलञ्च पाचयेत् ॥”
इति भावप्रकाशः ॥

जिह्वालिट्, [ह्] पुं, (जिह्वया लेढीति । लिह + क्विप् ।) कुक्कुरः । इति भूरिप्रयोगः ॥

जिह्वाशल्यः, पुं, (जिह्वाया शल्यमिव । अभिधानात् पुंस्त्वम् ।) खदिरवृक्षः । इति राजनिर्घण्टः ॥

जिह्वास्वादः, पुं, (जिह्वया स्वाद आस्वादनम् ।) लेहनम् । इति हेमचन्द्रः । ३ । ८८ ॥

जीनः, त्रि, (जिनाति जीर्य्यतीति । ज्या वयो-हानौ + “गत्यर्थेति ।” क्तः । ग्रहिज्येति सम्प्र-सारणम् । हल इति दीर्घः । ल्वादिभ्येति नत्वम् ।) वृद्धः । इत्यमरः । २ । ६ । ४२ ॥ (चर्म्मपुटे । यथा, मनुः । ११ । १३८ ।
“जीनकार्म्मुकवस्तावीन् पृथग् दद्यात् विशुद्धये ॥”)

जीमूतः, पुं, (जयति आकाशमिति । जि + “जेर्मूट् चोदात्तः ।” उणां ३ । ९१ । इति क्तः । मूडागमो धातोर्दीर्घश्च ।) पर्व्वतः । (यथा-मत्स्यपुराणे । १२० । ७५ ।
“जीमूतो द्रावणश्चैव मैनाकश्चन्द्रपर्व्वतः ।
आयतास्ते महाशैलाः समुद्रं दक्षिणं प्रति ॥” * ॥
जीवनं जलं मूत्रयति स्रावयतीति । पृषोदरा-दित्वात् साधुः । इति पुरुषोत्तमदेवः ।) मेघः । (यथा, महाभारते । ६ । १९ । ३१ ।
“राजानमन्वयुः पश्चात् जीमूता इव वार्षिकाः ॥”)
मुस्ता । देवताड़वृक्षः । इत्यमरः । ३ । ३ । ५८ ॥ इन्द्रः । भृतिकरः । घोषकलता । इति हेम-चन्द्रः ॥ (यथा, चरके सूत्रस्थाने प्रथमेऽध्याये ।
“धामार्गवमथेक्ष्वाकु जीमूतं कृतवेधनम् ॥”
सूर्य्यः । यथा, महाभारते । ३ । ३ । सूर्य्य-स्याष्टोत्तरशतनामकीर्त्तने । २२ ।
“वरुणः सागरोंऽशुश्च जीमूतो जीवनोऽरिहा ॥”
ऋषिविशेषः । यथा, महाभारते ५ । १११ । २४ ।
“जीमूतस्यात्र विप्रर्षेस्तपतस्य महात्मनः ॥”
मल्लविशेषः । भीमसेनस्तु विराटगृहवासकाले नियुद्धेनेनं निहतवान् । यथा, महाभारते । ४ । १२ । २२ ।
“ततस्तु वृत्रसङ्काशं भीमो मल्लं समाह्वयत् ।
जीमूतं नाम तं तत्र मल्लं विख्यातविक्रमम् ॥”
स्वनामख्यातो दशार्हस्य पौत्रः । यथा, हरि-वंशे । ३८ । २५ ।
“दशार्हस्य सुतो व्योमा व्योम्नो जीमूत
उच्यते ॥”
वपुष्मत्पुत्रः । स तु शाल्मलद्वीपस्य ईश्वर-विशेषः । यथा, ब्रह्माण्डे ३६ अध्याये ।
“शाल्मलस्येश्वराः सप्त सुतास्ते तु वपुष्मतः ।
श्वेतश्च हरितश्चैव जीमूतो रोहितस्तथा ॥”
अस्य वर्षस्तु एतन्नाम्नैव विख्यातः । यथा, तत्रैव,—
“जीमूतस्य च जीमूतो रोहितस्य च रोहितः ॥”
ऊनचत्वारिंशदक्षरवृत्तिविशेषः । तल्लक्षणा-दिकं छन्दःशब्दे द्रष्टव्यम् ॥ )

जीमूतकूटः, पुं, (जीमूतो मेघः कूटे शिखरे यस्य । अत्युन्नतत्वादेवास्य तथात्वम् ।) पर्व्वतः । इति हारावली । ५१ ॥

जीमूतमूलं, क्ली, (जीमूतस्य मुस्ताया मूलमिव मूलमस्य ।) शटी । इति रत्नमाला ॥

जीमूतवाहनः, पुं, (जीमूतो मेघो वाहनं यस्य ।) इन्द्रः । मेघवाहन इत्यमरदर्शनात् । धर्म्मरत्न-नामकस्मृतिसंग्रहकर्त्ता ॥ (यदुक्तं दायभागे ।
“बहुविधपूर्व्वनिबन्धव्याख्यासञ्जातसंशयस्यैतत् ।
जीमूतवाहनकृतं प्रकरणमपवृत्तये ध्येयम् ॥
परिभद्रकुलोद्भूतः श्रीमान् जीमूतवाहनः ।
दायभागं चकारेमं विदुषां संशयच्छिदे ॥”
शालिवाहननृपस्य पुत्रः । आश्विनकृष्णा-ष्टम्यां पुत्रसौभाग्यकामाभिर्नारीभिरयं पूज्यः । एतद्विवरणं जितऽष्टमीशब्दे द्रष्टव्यम् ॥ जीमूत-केतोर्नृपस्य पुत्रः । यथा, कथासरित्सागरे । २२ । २४ ।
“अथ तस्याचिरादेव राज्ञः सूनुरजायत ।
जीमूतवाहनं तं च नाम्ना स विदधे पिता ॥”)

जीमूतवाही, [न्] पुं, (जीमूतं वहति जीमूता-कारेणात्मानं परिणामयतीत्यर्थः । वह +